# हाईस्कूल परीक्षा 2013—14
## प्रश्नपत्र
## संस्कृत सामान्य

**समय : 3 घण्टे** **पूर्णांक : 100**

**(1)** **सर्वेप्रश्नाः अनिवार्याः सन्ति।**

**(2)** प्रश्नानां सम्मुखे अंकाः प्रदत्ताः।

**1.** उचित विकल्पं चित्वा लिखत।

**(अ)** 'रमेशः' इत्यस्मिन् पदे सन्धिः अस्ति —

(i) दीर्घ सन्धिः (ii) गुणसन्धिः

(iii) अयादि सन्धिः (iv) दीर्घ सन्धिः

**(ब)** ''जगन्नाथः' इत्यस्मिन् पदे सन्धिः अस्ति—

(i) स्वर सन्धिः (ii) व्यंजनसन्धि

(iii) विसर्ग सन्धिः (iv) दीर्घ सन्धि

**(स)** विसर्गसन्धेः उदाहरणम् अस्ति —

(i) तल्लयः (ii) सदैव

(iii) नमस्कारः (iv) सूर्योदयः

**(द)** 'पो+अनः' इत्यस्मिन सन्धिः अस्ति—

(i) पोअनः (ii) पानः

(iii) पवनः (iv) पोनः

**(इ)** अधोलिखितेषु अव्ययं चित्वा लिखत्—

(i) अहम् (ii) गत्वा

(iii) पिबामि (iv) यथा

**2.** **(अ)** ''हरिहरौ'' इत्यस्य पदे समासःविग्रहः भवति—

(i) हरि च हरौ च (ii) हरि च हरौ

(iii) हरिश्च हरश्च (iv) हरिः च हरः च

(ब) ''राजपुरूष'' इत्यस्य पदे समासः अस्ति–

(i) तृतीयातत्पुरूषः (ii) पंचमी तत्पुरूष

(iii) षष्ठी तत्पुरूषः (iv) सप्तमी तत्पुरूषः

(स) ''गंगायाःसमीपम्'' इत्यस्य पदस्य समासिकपदम् अस्ति–

(i) गंगा सीमपम् (ii) उपगंगम

(iii) गंगसमीपम् (iv) अपगंगम्

(द) ''परागतः'' इत्यस्मिन पदे उपसर्गः अस्ति–

(i) परि (ii) प्र

(iii) प्रति (iv) परा

(इ) अधोलिखितेषु उपसर्गः नास्ति–

(i) प्रति (ii) अति

(iii) अपि (iv) अस्ति

3. (अ) 'क्त' प्रत्ययस्य उदाहरणम् अस्ति–

(i) गतवान् (ii) पठित्वा

(iii) गन्तुम (iv) कथितः

(ब) **''गम्+तुमुन''** इत्यस्य पदम् भविष्यति

(i) गमतुमुन् (ii) गच्छितुम्

(iii) गन्तुम् (iv) गमितुम्

(स) ''गुणिन(गुणी)'' इत्यस्मिन पदे प्रत्ययः अस्ति–

(i) आप् (ii) इन्

(iii) टाप् (iv) ठक्

**(द)** ''क्रीडित्वा'' इत्यस्मिन् पदे प्रत्ययः अस्ति–

(i) क्तिन्　　(ii) क्तवतु

(iii) तुमुन्　　(iv) क्त्वा

**(इ)** 'परसदनविष्टः' को .................. न याति।

(i) हर्षः　　(ii) क्रोध

(iii) लघुत्वम्　　(iv) यशं

4. (अ) ''पास्यति'' इत्यस्मिन् पदे लकारः अस्ति–

(i) लट्लकारः　　(ii) लोट्लकारः

(iii) लृट् लकारः　　(iv) लड़लकारः

(ब) ''लप्स्ये'' इत्यस्मिन् पदे वचनम् अस्ति–

(i) एक वचन　　(ii) द्विवचन

(iii) बहुवचन　　(iv) अन्य वचन

(स) ''द्रक्ष्यति'' इत्यस्मिन् पदे धातुः अस्ति–

(i) द्रक्ष　　(ii) दृश

(iii) दृ　　(iv) दश्

(द) ''पिवेत'' इत्यस्मिन् पदे पुरूषः अस्ति–

(i) प्रथमः　　(ii) मध्यमः

(iii) उत्तम　　(iv) अधमः

(इ) ''अहं अपि आपणं गच्छामि'' इत्यस्मिन् वाक्ये अव्ययम् अस्ति–

(i) अहम्　　(ii) अपि

(iii) आपणं　　(iv) गच्छामि

5. प्रदत्तैः शब्दैः रिक्तस्थानपूर्तिं कुरूत–

( निश्चयो, श्रेष्ठः अनिलं, देवालयं, कुशलं)

(अ) वायुः ........... ददाति।

(ब) ज्येष्ठः ............ कुले लोके।

(स) अत्र .......... तत्राप्यस्तु।

(द) वासुदेवः कञिचत् .................. अपश्यत्।

(इ) स्वधियो .......... नास्ति यस्य स भ्रमति स्वयं।

6. निम्नलिखित प्रश्नेषु त्रयाणां प्रश्नानां उत्तराणि संस्कृत भाषायां एक वाक्येन लिखत्।

(अ) कीदृशाः छात्राः उच्च नागरिकाः अभवन् ?

(ब) छत्रसालः कस्य शिष्यः आसीत् ?

(स) देवता कुत्र रमन्ते ?

(द) कः सर्व वस्तुषु हीनः ?

7. अधोलिखितेषु शब्देषु शब्दानां रूपाणि निर्देशानुसारं त्रिषु वचनेषु लिखत – (केचित् द्वे)

(क) राम – पंचमी विभक्तिः

(ख) पितृ – तृतीया विभक्तिः

(ग) भवत् – द्वितीया विभक्तिः

(घ) किम् (स्त्री)– सप्तमी विभक्तिः

8. 'राजानम्' अथवा 'मया' इति शब्द रूपस्य विभक्ति वचनं च लिखत।

9. अधोलिखितेषु गद्यांशेषु गद्यांश द्वयस्य प्रश्नानाम् उत्तराणि संस्कृत भाषायां देयानि–

**(अ)** काकस्य रटनं श्रुत्वा वृक्षस्य समीपे चरन्तः वृक्षस्याग्रे उड्यमानाः वृक्षस्य कोटरेषु निवसन्तः च सर्वे प्राणिनः पशवः पक्षिणः सर्पाश्च समायाताः। तेषां मध्ये प्रथम सर्पः फटाटोपं कुर्वन् न्यगदत् ''पितृ पितामहानां कालादपि अहम् अत्रैव निवसामि। अतोऽयं वृक्षः मदीय एव ''इति। ततः शाखातः शाखान्तरं चंक्रम्य एकः कीटः प्रत्यवदत् ''मदीयै अर्भ कैः सार्द्धम् अहं बहुवर्षेभ्यः अत्रैव उषितवानस्मि। अतोऽयं वृक्षः ममैव'' इति।

(i) काकस्य किम् श्रुत्वा सर्वे प्राणिनः समायाताः ?

(ii) शाखातः शाखान्तरम् चंक्रम्य कः प्रत्यवदत् ?

(iii) सर्प्ः किम् कुर्वन् न्यगदत् ?

(iv) ''अतोऽयं वृक्षः ममैव'' इति कः अवदत् ?

(v) 'श्रुत्वा' इत्यस्य पदस्य प्रकृतिं प्रत्ययंच पृथक्कुरूत।

**(ब)** गंगातीरे मार्कण्डेयः नाम कश्चन् मुनिः वसति स्म। तस्य गुरूकुले बहवः शिष्याः आसन्। वासुदेवः तस्यप्रिय शिष्यः। तस्य द्वादश वर्षात्मक अध्ययनं यदा समाप्तम् तदा गुरूः ताम् आहूय अवदत्– ''शिष्या् अधुना–भवान् सर्वविद्या पारंगतः अस्ति। अतः इतः परं स्वग्रामं गन्तुम् अर्हति भवान्। गमनात् पूर्वम् भवता द्वारकापुरस्य देवराजस्य गृहं दृष्टवा आगन्तव्यम्। किन्तु गृहस्यान्तः न गन्तव्यम्'' इति।

(i) गंगातीरे कः वसति स्म ?

(ii) बहवः शिष्याः कुत्र आसन् ?

(iii) वासुदेवः कस्य प्रिय शिष्यः आसीत् ?

(iv) गुरू शिष्यम् आहूयः कदा अवदत् ?

(v) सर्व विद्या पारंगतः कः अभवत् ?

**(स)** मनुष्य सदा निरोगः भवेत। अतएव स्वस्थ शरीरार्थम् बहवः उपायाः वर्णिताः सन्ति। वैद्यक शास्त्रम् आरोग्यशास्त्रम् अपि कथ्यते। स्वास्थ्य घातकाः ये राजरोगादयः सन्ति। तेषां सर्वथा शमनाय द्वासप्तति विधाः चिकित्साः करणीयाः।

(i) मनुष्यः सदा कीदृशः भवेत ?

(ii) स्वस्य शरीरार्थम् कति उपायाः वर्णिताः सन्ति ?

(iii) वैद्यकशास्त्रस्य अपरं नाम किं अस्ति ?

(iv) स्वास्थ्य घातकाः ये सन्ति तेषां सर्वथा शमनाय कति विधाः चिकित्साः करणीयाः ?

(v) ''नीरोगः इति शब्दस्य विपरीतार्थी पदं लिखत।

**10.** अधोलिखित गद्यांशेषु पद्यांशद्वयस्य प्रश्नानाम उत्तराणि संस्कृतभाषायां लिखत।

**(अ)** इत्यर्ध्यपात्रानुमितव्ययस्य रधोरूदारामपि गां निशम्य।
स्वार्थोपपत्तिं प्रति दुर्बलाशस्त मित्यवोचद्वरतन्तुशिष्यः।।

(i) वरतन्तु शिष्यः कः ?
(ii) वरतन्तु शिष्यः का प्रति दुर्बलाशस्तम् अभवत् ?
(iii) 'रघोः' इत्यस्य पदस्य विभक्ति वचनंच लिखत।
(iv) वरतन्तु शिष्यः काम् गाम् अश्रृणोत ?
(v) ''निशम्य'' इत्यस्य पदस्य प्रकृति प्रत्ययंच पृथक्कुरूत।

**(ब)** मनसा चिन्तितं कार्य वाचा नैव प्रकाशयेत्।
मन्त्रेण रक्षयेद् गूढं कार्ये चाऽपि नियोजयेत्।।

(i) कार्य कया चिन्तितम् ?

(ii) वाचा किं न प्रकाशयेत् ?

(iii) गूढं केन रक्षयेत् ?

(iv) कार्ये किं नियोजयेत् ?

(v) ''रक्षयेत्'' इति शब्दस्य धातुः लकारः पुरूषः च लिखत्।

(स) वहन्ति वर्षन्ति नदन्ति भान्ति ध्यायन्ति नृत्यन्ति समाश्वसन्ति।
नद्योघना मत्तगजाः वनान्ताः प्रियविहीनाः शिखिनः प्लवगंमाः।।

(i) काः वहन्ति ?

(ii) के वर्षन्ति ?

(iii) मत्तगजाः किं कुर्वन्ति ?

(iv) के नृत्यन्ति ?

(v) ''ध्यायन्ति'' इति शब्दस्य धातुः लकारः पुरूषः, वचनं च लिखत।

11. **युग्म मेलनं कुरूत–**

| ''अ'' | ''ब'' |
|---|---|
| (i) सगरस्य | गुरू |
| (ii) रघुः | षष्टिसहस्त्र पुत्राः |
| (iii) वरतन्तु | मदो मे व्यपगतः |
| (iv) गज–इव | दानी |

12. शुद्धवाक्यानां समक्षं ''आम्'' अशुद्धवाक्यानां समक्षं न इति लिखत–

(अ) वृक्षाणां छेदन महत् पापम्।

(ब) एकः शून्यगृहम् अनु प्रविशेत्।

(स) सगरस्य पुत्राः भस्मी भूताः जाताः।

(द) रघुः वरतन्तु शिष्यः आसीत्।

13. अधोलिखितेषु प्रश्नेषु चतुर्णां प्रश्नानाम् उत्तराणि संस्कृत भाषायां एकपदेन लिखत–

(i) रविः केन तपते ?

(ii) रथकारस्य नाम किम् आसीत् ?

(iii) ''बुन्देलकेशरी' इति नाम्ना कः प्रसिद्ध ?

(iv) ग्रामे कः वृक्षः आसीत् ?

(v) सूर्य वंशस्य राजा कः आसीत् ?

14. अस्मिन प्रश्नपत्रे समागतान श्लोकान विहाय स्वपाठ्य पुस्तकात् कण्ठस्थीकृत सुभाषितद्वयं लिखत।

**15.** स्वस्य प्राचार्यस्य कृते अवकाशार्थम् प्रार्थनापत्रं संस्कृत भाषायाम् लिखत।

अथवा

स्वस्य मित्राय स्वाध्ययनस्य विषये एकं पत्रं लिखत।

**16.** अधोलिखितेषु पंच अशुद्धकारकवाक्यानां शुद्धिः करणीया।

(क) श्री गणेशं नमः।

(ख) मम दुग्धं रोचते।

(ग) सीता रामस्य सह वनं गता।

(घ) त्वं पठामि।

(ङ) सर्वे बालकाः धावति।

(च) सैनिकः अश्वेन पतति।

(छ) एकः बालकः भवनेन पतति।

**17.** अधोलिखित वाक्यानां कथानुसारेण क्रम संयोजनम् कुरूत–

(i) वासुदेवः तस्य प्रियः शिष्यः।

(ii) सः अपृच्छत् ''देवराजस्य गृहं कुत्र ? इति।

(iii) मया रामदेवस्य जीवनम एवं अनुसरणीयम्।

(iv) गंगातीरे मार्कण्डेयः नाम कश्चन मुनिः वसितस्म।

(v) 'गमनात् पूर्व भवतः द्वारका पुरस्य गृहं दृष्ट्वा आगन्तव्यम्।

**18.** अधोलितिखत गघांशं सम्यक पठित्वा प्रश्नानां उत्तराणि लिखत्–

सतां सज्जनानां, संगतिः सम्पर्कः संसर्गो वा सत्संगतिः इति कथ्यते। वस्तुतः सत्संगात एव मानवः समुन्नतो भवति सज्जनानां संसर्गेण जनःसज्जनः भवति, दुर्जनानां संसर्गेण च दुर्जनः भवति। स्थाने एवोक्त''संसर्गजा दोषगुणाः भवन्ति'' इति। अतः स्व समुन्नतिं इच्छिता जनेन सर्वदा सतामेव संगतिर्विधेया।

(अ) अस्य गद्यांशस्य शीर्षक लिखत।
(ब) केन जनः सज्जनः भवति ?
(स) स्व समुन्नति इच्छिता जनेन किं करणीयम् ?
(द) गद्यांशस्य सारं लिखत।
(इ) दुर्जनः शब्दस्य विलोम शब्दं लिखत।

19. अधोलिखितेषु एकं विषयं स्वीकृत्य शतशब्देषु संस्कृतभाषायाम् निबंधं लिखत–

(अ) महाकविः कालिदासः

(ब) सदाचारः

(स) दीपावलिः

(द) मम दिन चर्या।

– – X X – –

# हाईस्कूल परीक्षा 2013–14
## आदर्श उत्तर
## संस्कृत सामान्य

**समय : 3 घण्टे** **पूर्णांक : 100**

| | | | | |
|---|---|---|---|---|
| 1. | (अ) | (ii) | गुण सन्धि | 05 |
| | (ब) | (ii) | व्यंजन संन्धिः | |
| | (स) | (iii) | नमस्कारः | |
| | (द) | (iii) | पवनः | |
| | (इ) | (iv) | यथा | |
| 2. | (अ) | (iii) | हरिश्च हरश्च | 05 |
| | (ब) | (iii) | षष्ठी तत्पुरूष | |
| | (स) | (ii) | उपगग्ड़ंम् | |
| | (द) | (iv) | परा | |
| | (इ) | (iv) | अस्ति | |
| 3. | (अ) | (iv) | कथितः। | 05 |
| | (ब) | (iii) | गन्तुम् | |
| | (स) | (ii) | इन् | |
| | (द) | (iv) | क्त्वा | |
| | (इ) | (iii) | लघुत्वम् | |
| 4. | (अ) | (iii) | लृट्लकारः। | 05 |
| | (ब) | (i) | एकवचनम् | |
| | (स) | (ii) | दृश् | |
| | (द) | (i) | प्रथम पुरूषः | |
| | (इ) | (ii) | अपि | |

| | | | |
|---|---|---|---|
| 5. | (अ) | अनिलं। | 05 |
| | (ब) | श्रेष्ठः | |
| | (स) | कुशलं | |
| | (द) | देवालयं | |
| | (इ) | निश्चयो। | |

6. (अ) ये छात्राः क्षणं–क्षणं संयोज्य विद्याध्ययने समयस्य सदुपयोग कृतवन्तः ते एव उच्च नागरिकाः अभवन। 06

(ब) छत्रसालः स्वामि प्राणनाथस्य शिष्यः आसीत्।

(स) यत्र नार्यस्तु पूज्यन्ते तत्र देवताः रमन्ते।

(द) यः विद्यारत्नेन हीनः सः सर्ववस्तुषुहीनः।

7. (क) रामात् रामाभ्याम् रामेभ्यः 04

(ख) पित्रा पितृभ्याम् पितृभिः

(ग) भवन्तम् भवन्तौ भवतः

(घ) मम, मे अवयोःनौ अस्माकम्, नः

(ड़) कस्याम् कयोः कासु

8. (i) काकस्य रटनं श्रुत्वा सर्वे प्राणिनः समायाताः। 10

(ii) एकःकीटः प्रत्यवदत।

(iii) सर्पःफटाटोपं कुर्वन् न्यगदत्।

(iv) ''अतोऽयं वृक्षःममैव'' इति कीटः अवदत्।

(v) श्रुधातुः क्त्वा प्रत्ययः च।

(ख) (i) गंगातीरे मार्कण्डेयः नाम कश्चन मुनिः वसति स्म।

(ii) तस्य गुरूकुले बहवः शिष्याः आसन्।

(iii) वासुदेवः मार्कण्डेयस्य प्रिय शिष्यः आसीत्।

(iv) तस्य द्वादश वर्षात्मक अध्ययनं यदा समाप्त तदा गुरूः शिष्यं आहूत अवदत।

(v) सर्वविद्या पारंगतः वासुदेवः अभवत्।

(ग) (i) मनुष्य सदा निरोगःभवेत्।

(ii) स्वस्थ शरीरार्थम् बहवः उपायाः वर्णिताः सन्ति।

(iii) वैधक शास्त्रस्य अपरंनाम आरोग्य शास्त्रम् अस्ति।

(iv) स्वास्थ्य घातकाः ये सन्ति तेषां शमनाय द्वि सप्तति विधाः चिकित्सा करणीयाः।

(v) रोगः इति।

10.(अ) (i) वरन्तु शिष्यः कौत्सः। 10

(ii) वरतन्तु शिष्यः स्वार्थोपपत्ति प्रति दुर्बलाशस्तम् अभवत्।

(iii) षष्ठी विभक्ति एक वचनंच।

(iv) वरतन्तु शिष्यः रघोरूदारां गाम अश्रृणोत् रघो।

(v) ''नि'' उपसर्ग, ''शम्'' धातुः, ''ल्यप्'', प्रत्ययं च।

(ब) (i) कार्य मनसा चिन्तितम्।

(ii) मनसा चिन्तितं कार्य वाचा नैव प्रकाशयेत्।

(iii) गूढ़ं मन्त्रेण रक्षयेत्।

(iv) गूढ़ं मन्त्रेण रक्षयेत् कार्ये चाऽपि नियोजयेत्।

(v) रक्षयेत् – धातु–रक्ष्, लकार–विधिलिंग, पुरूषः–अन्यः।

(स) (i) नद्योवहन्ति।

(ii) घनाः वर्षन्ति।

(iii) मत्तगजाः नदन्ति।

(iv) शिखिनः नृत्यन्ति।

(v) ध्यायन्ति–धातु–ध्यै,लकारःलट पुरूषः अन्यःवचनम– बहुवचन।

11. **युग्म मेलनं कुरूत–** 04

| ''अ'' | ''ब'' |
|---|---|
| (i) सगरस्य | षष्टिसहस्त्र पुत्राः |
| (ii) रघुः | दानी |
| (iii) वरतन्तु | गुरू |
| (iv) गज–इव | मदो मे व्यपगतः |

12. 04

(अ) आम्
(ब) न
(स) आम्
(द) न

13.

(क) सत्येन

(ख) उज्ज्वलकः

(ग) छत्रसालः

(घ) न्यग्रोध वृक्षः

(ङ) सगरः

14. कोऽपि सुभाषित द्वयं

यथा

(i) गंगा पापं शशीतापं दैन्यं कल्पतरूस्तथा।
पापं तापं च दैन्यं च ध्नन्ति सन्तो महाशयाः।।

(ii) दानेन भूतानि वशी भवन्ति, दानेन वैराण्यपि यान्तिनाशम्।
परोऽपि बन्धुत्वमुपैति दानै, दानं हि सर्वव्यसनानि हन्ति।।

15. प्राचार्य स्य कृते अवकाशार्थम्। 04

प्रार्थना पत्रं

सेवायाम्,

**माननीय प्राचार्य महोदयः**

शासकीय उच्चतर माध्यमिक विद्यालयः

इन्दौर नगरम्, मध्यप्रदेशः।

विषयः–अवकाशार्थं–प्रार्थनापत्रम्

महोदयः

सविनयं निवेदनम् अस्ति। यद अहम् अद्य सहसा ज्वर पीडितः अस्मि। अतः विद्यालयम् आगन्तुम् असमर्थः अस्मि। कृपया मम पंचदिवसानाम् अवकाश स्वीकुर्वन्तु।

दिनांक 07/08/2013

भवदीयः शिष्यः
राजेश
कक्षा दशमी 'अ'वर्ग

अथवा

मित्राय अध्ययनस्यकृते पत्रम–

283 राम बाग क्षेत्रम्
इन्दौर, मध्यप्रदेश
दिनांक 31/08/2013

प्रियः दीपकः

सादरं नमः

अधुना अस्माकम् शिक्षणम् नियमेन आरब्धम्। अहं प्रतिदिनं प्रातः पंचवादन समये उत्थाय सप्तवादन समयपर्यन्तम् स्वाध्यायं करोमि। संस्कृत विषये अहं कक्षायां प्रथमः अस्मि। अन्येषु विषयेषु अपि मम स्थितिः उत्तमा अस्ति।

भवतः
राजेशः

16 (क) श्री गणेशाय नमः। 05

(ख) मह्मं दुग्धं रोचते।

(ग) सीता रामेण सह वनं गता।

(घ) त्वं पठसि।

(ङ) सर्वे बालकाः धावन्ति।

(च) सैनिकः अश्वात् पतति।

(छ) एकः बालकः भवनात् पतति।

17. (i) गंगातीरे मार्कण्डेयः मुनिः वसति स्म। 5

(ii) वासुदेवःतस्य प्रियः शिष्यः।

(iii) गमनात् पूर्व भवतः द्वारका पुरस्य गृहं दृष्टवा आगन्तव्यम्।

(iv) सः अपृच्छत् ''देवराजस्य गृहं कुत्र इति''।

(v) मया रामदेवस्य जीवनम् एव अनुसरणीयम्।

18. (अ) सत्संगतिः। 05

(ब) सज्जनानां संसर्गेण जनः सज्जनः भवति।

(स) स्व समुन्नतिम् इच्छता जनेन सर्वदासतामेव संगतिर्विधेया।

(द) गद्यांशस्य सारः यत्– 'सर्वदा सतामेव संगतिः करणीयाः इति।

(इ) दुर्जनः शब्दस्य विलोमशब्दं 'सज्जनः इति।

19. सम्पूर्णशुद्धनिबन्धस्य कृते दश अंकाः निर्धारिताः सन्ति। 10

– – X X – –

## हाईस्कूल परीक्षा 2013–14
## आदर्श प्रश्नपत्र
## संस्कृत सामान्य

समय : 3 घण्टे पूर्णांक : 100

(1) सर्वेप्रश्नाः अनिवार्याः सन्ति।

(2) प्रश्नानां सम्मुखे अंकाः प्रदत्ताः।

1. उचित विकल्प चित्वा लिखत्।

(अ) 'सदानन्दः' इत्यस्मिन् पदे सन्धिः अस्ति– 1x5

(i) अयादि सन्धिः (ii) व्यंजन संन्धिः

(iii) विसर्ग सन्धिः (iv) गुणसन्धिः

(ब) 'मनः+रथः' इत्यस्य सन्धिः अस्ति–

(i) मनरथः (ii) मनस्रथः

(iii) मनोरथः (iv) मनःरथः

(स) विसर्गसन्धेः उदाहरणम् अस्ति–

(i) पवनः (ii) जगदीशः

(iii) हिमालयः (iv) नमस्ते

(द) 'देवेन्द्रः' इत्यस्मिन् पदे सन्धिः अस्ति–

(i) गुणसन्धिः (ii) यण्सन्धिः

(iii) दीर्घसन्धिः (iv) अयादिसन्धि

(ई) अधोलिखितेषु अव्ययम् नास्ति–

(i) इव (ii) अद्य

(iii) बालकः (iv) कदा

2. (अ) ''कार्यकुशलः'' इत्यस्मिन् पदे समासः अस्ति– 1x5

(i) द्वितीया तत्पुरूष (ii) तृतीया तत्पुरूषः

(iii) चतुर्थी तत्पुरूषः (iv) सप्तमी तत्पुरूषः

(ब) ''अव्ययीभाव समासस्य उदाहरणम् अस्ति–

(i) अनुरूपम् (ii) पीताम्बरं्

(iii) राम लक्ष्मणौ (iv) कृष्णसर्पः

(स) 'हरि हरौ' इत्यस्मिन् समास विग्रहः भवति–

(i) हरि च हरौ (ii) हरि च हरौ च

(iii) हरिश्च हरश्च (iv) हरिः हरौ च

(द) अधोलिखितेषु उपसर्गः अस्ति–

(i) यत्र (ii) अधि

(iii)तत्र (iv) इदानीम्

(इ) ''निर्धनः'' इत्यस्मिन पदे उपसर्गः अस्ति–

(i) निस (ii) नि

(iii) निर् (iv) निध

3. (अ) 'द्रक्ष्यति' इत्यस्मिन् पदे धातुः अस्ति– 1x5

(i) द्रक्ष (ii) दृश्

(iii) दा (iv) रक्ष्

(ब) ''भवेयुः'' इत्यस्मिन् पदे वचनम् अस्ति–

(i) एकवचनम् (ii) द्विवचनम्

(iii) बहुवचनम् (iv) कोऽपि नास्ति

(स) '''अनयन्'' इत्यस्मिन् पदे लकारः अस्ति–

(i) लोट्लकार (ii) लट्लकारः

(iii) विधिलिंगलकारः (iv) लड्.लकारः

(द) ''पचेः'' इत्यस्मिन पदे पुरूषः अस्ति–

(i) प्रथम पुरूषः (ii) मध्यम पुरूषः

(iii) उत्तमपुरूषः (iv) आदि पुरूषः

(इ) ''मनः जाग्रतः कुत्र उदैति'' इत्यस्मिन वाक्ये अव्ययम् अस्ति–

(i) मनः (ii) जाग्रतः

(iii) कुत्र (iv) उदैति

4. (अ) 'सेवमानः' इत्यस्मिन् पदे प्रत्ययः अस्ति– 1x5

(i) शानच् (ii) क्तवतु

(iii) तुमुन् (iv) शतृ

(ब) ''विद्या+मतुप्'' इत्यस्य पदं भविष्यति–

(i) विद्वान (ii) विद्यावान

(iii) विद्यमान (iv) विद्यामत्

(स) 'क्तवतु' प्रत्ययस्योदाहरणम् अस्ति–

(i) पठितवान् (ii) गुणवान्

(iii) धनवान (iv) कम्पभान

(द) ''सः भोजनं कृत्वा पठति'' इत्यस्मिन् वाक्ये कृदन्त प्रत्ययः अस्ति–

(i) ल्यप् (ii) शतृ

(iii) क्त्वा (iv) क्त

(इ) 'परसदननिविष्टः को ........ न याति''।

(i) श्रैष्ठतम् (ii) लघुत्वं

(iii) गुरूत्म् (iv) घनत्वम्

5\. प्रदत्त शब्दैः रिक्तस्थानानि पूरयत – 1x5

(सप्तहोता, प्राणैः, कुशलं, पापेऽपि, श्रेष्ठः)

(अ) अत्र .............. तत्रास्तु।

(ब) न ............ पापी स्यात्।

(स) येन यज्ञस्तायते .................।

(द) ज्येष्ठः ........ कुले लोके।

(इ) परोपकारः कर्तव्यः .......... कण्ठगतैरपि।

6\. अधोलिखित प्रश्नेषु त्रयाणां प्रश्नानाम् उत्तराणि संस्कृत भाषायाम् एक वाक्येन लिखत। 6

(क) दयानन्दस्य जन्मनाम किम् आसीत् ?

(ख) मे मनः किम् अस्तु ?

(ग) घटोत्कचः अन्ते किं कथयति ?

(घ) सर्वप्राचीना भाषा का अस्ति ?

(ङ.) देवताः कुत्र रमन्ते ?

7\. अधोलिखितेषु शब्देषु द्वयोः शब्दरूपाणि निर्देशानुसार त्रिषु वचनेषु लिखत – 2

(i) 'साधु' – तृतीया विभक्तिः

(ii) राजन् – षष्ठी विभक्तिः

(iii) अस्मद् – प्रथमा विभक्तिः

8\. 'अधोलिखितेषु पदेषु द्वयोः पदयोः विभक्ति वचनं च लिखत– 2

(i) पितुः (ii) रामेषु (iii) त्वया

9\. अधोलिखित गद्यांशेषु गद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृत भाषायां देयानि। 5X2

(अ) वरूण देवः वृष्टिं वर्षति। सूर्यदेवः प्रकाशं प्रयच्छति। भूमाता वृक्षस्य आधारभूता अस्ति। वायुः अनिलं ददाति। ते सर्वे वृक्षं पालयन्ति रक्षन्ति पोषयन्ति च। ते

न कदापि'' मम अधिकारः वर्तते'' इति अवदन्। ते सर्वे परोपकारिणः। परं यूयं सर्वे परोपकारिणः वृक्षस्य सहाय्यं स्वीकृत्य तमेव नाशयितुं कृत संकल्पा यूयं स्वाश्रयमेव नाशयथ अस्मिन् वृक्षे छिन्ने सति यूयं कुत्र गमिष्यथ ?

(i) कः वृष्टिं वर्षति ?

(ii) सूर्यदेवः किं प्रयच्छति ?

(iii) का वृक्षस्य आधारभूता अस्ति ?

(iv) कः अनिलं ददाति ?

(v) के परोपकारिणः ?

(ब) सूर्यवंशस्य राजा सगरः आसीत्। सः एकदा अश्वमेद्ययागं कृतवान। यागस्य अन्ते यागस्य अश्वः यत्र तत्र संचारं कृतवान्। अश्वमेद्य कृत्वा सगरः स्वयम् इन्द्रं भविष्यति इति देवेन्द्रस्य असूया आसीत्। तस्मात् सः यागस्य विघ्नं कर्तुं मार्गं चिन्तितवान्। ततः अश्वं गृहीत्वा पाताललोके कपिलमुनेः पुरतः स्थापितवान्। तदा मुनिः तपः कुर्वन् ध्याने आसीत्। अतः सः किमपि न ज्ञातवान्।

(i) सूर्यवंशस्य राजा कः आसीत् ?

(ii) सः एकदा किं कृतवान ?

(iii) यागस्य अश्वः कुत्र संचारं कृतवान् ?

(iv) कः यागस्य विघ्नं कर्तु मार्ग चिन्तितवान ?

(v) इन्द्रः अश्वं गृहीत्वा पाताललोके कस्य पुरतः स्थापितवान् ?

(स) मध्यप्रदेशस्थानगरीयं पौराणिकी ऐतिहासिकी च वर्तते। विदिशा पूर्वस्मिन काले ''भेलसा' इति नाम्ना सुविख्याता आसीत्। एतस्य कारणं सूर्यदेवतायाः मन्दिरस्य ''भेल्लस्वामिनः'' इति लोकख्यातिरेव। पुरा विदिशानगरी समुन्नतमेकं वाणिज्यिक केन्द्रमासीत। योगदर्शनस्य प्रणेता व्याकरणमहाभाष्यस्यकर्ता महर्षि पतंजलिः सम्राट् अशोकोऽपि विदिशया सह सम्बंद्धौ आस्ताम्।

(i) मध्यप्रदेशस्था का नगरी पौराणिकी ऐतिहासिकी च वर्तते ?

(ii) विदिशा प्राचीनकाले कया नाम्ना सुविख्याता आसीत् ?

(iii) ''भेल्लस्वामिनः'' इति कस्य मंदिरस्य लोकख्याति ?

(iv) पुरा विदिशानगरी कीदृशं केन्द्रमासीत् ?

(v) पतंजलिः कः आसीत ?

10. अधोलिखित पद्यांशेषु पद्यांशद्वयस्य प्रश्नानाम उत्तराणि संस्कृत भाषायां लिखत– 5X2

(अ) दानेन भूतानिवशी भवन्ति दानेन वैराण्यपि यान्ति नाशम्।

परोऽपि बन्धुत्वमुपैति दानैर्दानं हि सर्वव्यसनानि हन्ति।।

(i) भूतानि केन वशी भवन्ति ?

(ii) दानेन कानि नाशं यान्ति ?

(iii) कैः परः अपि बन्धुत्वम् उपैति ?

(iv) दानं कानि हन्ति ?

(v) ''यान्ति'' इति पदस्य पुरूषं वचनंच लिखत ?

(ब) मत्ता गजेन्द्रा मुदिता गवेन्द्रा,

वनेषु विक्रान्ततरा मृगेन्द्राः।

रम्या नगेद्रा निभृताः नरेन्द्राः,

प्रक्रीडितो वारिधरैः सुरेन्द्रः।।

(i) मत्ताः के ?

(ii) गवेन्दाः कीदृशाः भवन्ति ?

(iii) वनेषु विक्रान्ततराः के ?

(iv) के निभृताः सन्ति ?

(v) सुरेन्द्रः कैः सह प्रक्रीडितः ?

(स) दरिद्रता धीरतया विराजते, कुवस्त्रता शुभ्रतया विराजते।

कदन्नता चोष्णतया विराजते, कुरूपता शीलतया विराजते।।

(i) दरिद्रता कया विराजते ?

(ii) का शुभ्रतया विराजते ?

(iii) कदन्नता कया विराजते ?

(iv) शीलतया का विराजते ?

(v) ''विराजते'' इति पदस्य धातुः लकारं च लिखत।

11. युग्म मेलनं कुरूत– 4

| ''अ'' | ''ब'' |
|---|---|
| (i) समयस्य सदुपयोगः | महाभारतम् |
| (ii) प्रकृतिदत्त वरः | वृद्धः |
| (iii) द्विजश्रेष्ठः | कर्तव्यः |
| (iv) वेदव्यास | वृक्षः |

12. शुद्ध वाक्यानां समक्षं 'आम्' अशुद्व वाक्यानां समक्षं 'न' इति लिखत– 4

(अ) वैदिककाले नारी शिक्षिता आसीत् ।

(ब) कुबेरः रघु धनं न दत्तवान् ।

(स) शुद्धोदनः राहुलस्य पिता आसीत्।

(द) मानव शरीरं देवदुर्लभम् अस्ति।

13 अधोलिखितेषु प्रश्नेषु चतुर्णा प्रश्नानाम् उत्तराणि संस्कृतभाषायां एक पदेन लिखत। 4

(अ) भूषणः कस्याः भाषायाः महाकवि आसीत् ?

(ब) छत्रसालस्य पितुः नाम किम ?

(स) कुलं का रक्षितुम इच्छति ?

(द) आत्महिताय किम् अनुष्ठेयम् ?

(इ) जलं बिना किं न सम्भवम् ?

14. प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्य पुस्तकात् सुभाषितद्वयं लिखत। 4

15. स्व प्राचार्यस्य कृते छात्रवृत्यर्थ प्रार्थनापत्रं संस्कृत भाषायाम् लिखत। 4

अथवा

स्वमित्रस्य कृते स्वअध्ययनस्य वर्णयन् एकं पत्रं लिखत।

16. अधोलिखितेषु पंच अशुद्ध कारक वाक्यानांशुद्धिः करणीया। 5

(अ) जलस्य बिना जीवनं नास्ति।

(ब) बालकः मोदकं रोचते।

(स) श्री रामं नमः।

(द) बालकः भवनेन पतति।

(इ) त्वम्ः भोपालनगरे निवसामि।

(य) कृषकः ग्रामे गच्छति।

17. अधोलिखित वाक्यानां कथानुसारेण क्रम संयोजनं कुरूत– 5

(क) ततः वासुदेव रामनाथपुरं प्राप्त रामदेवस्य गृहम् अगच्छत्।

(ख) गंगातीरे मार्कण्डेयः नाम कश्चन् मुनिः वसति स्म।

(ग) शिष्यः अनन्तरं रामनाथपुरं प्रति प्रस्थितवान्।

(घ) वासेदवः तस्य प्रियशिष्यः आसीत्।

(ड़) किचिंदग्रे गतः वासुदेवः कंचित् देवालयम् अपश्यत्।

16. अधोलिखितेषु गद्यांशं सम्यक् पठित्वा प्रश्नानाम् उत्तराणि लिखत–

सतां सज्जनानां संगतिः सम्पर्कः संसर्गो वा सत्संगतिः इति कथ्यते। वस्तुतः सत्संगात् एव मानवः समुन्नतो भवति। सज्जनानां संसर्गेण जनः सज्जनः भवति, दुर्जनानां संसर्गेण च दुर्जनः भवति। स्थाने एवोक्तं ''संसर्गजा दोषगुणा भवन्ति'' इति। अतः समुन्नतिम् इच्छता जनेन सर्वदा सतामेव संगतिर्विधेया।

(i) अस्य गद्यांशस्य शीर्षकं लिखत ?

(ii) स्वसमुन्नतिम् इच्छता जनेन किं करणीयम् ?

(iii) केन जनः सज्जनः भवति ?

(iv) गद्यांशस्य सारं लिखत ?

(v) ''दुर्जनः'' इति शब्दस्य विलोमशब्दं लिखत ?

19. अधोलिखितेषु एकं विषयं स्वीकृत्य शतशब्देषु संस्कृत भाषाया निबंधं लिखत्

(अ) संस्कृत भाषायाः महत्वम्

(ब) महाकविः कालिदासः

(स) मम दिनचर्या।

(द) छात्रजीवनम्।

– – x x – –

# हाईस्कूल परीक्षा 2013–14
## आदर्श उत्तर
## संस्कृत सामान्य

समय : 3 घण्टे                                                  पूर्णांक : 100

1. उचित विकल्पं चयनम्।                                  1X5
   - (अ) (ii व्यंजन सन्धिः
   - (ब) (ii) मनोरथ
   - (स) (iv नमस्ते
   - (द) (i) गुण सन्धिः
   - (इ) (iii) बालकः

2. (अ) (iv) सप्तमी तत्पुरूष                                  1X5
   - (ब) (i) अनुरूपम्
   - (स) (iii) हरिश्च हरश्च
   - (द) (ii) अधि
   - (इ) (iii) निर्

3. (अ) (ii) दृश्                                  1X5
   - (ब) (iii) बहुवचनम्
   - (स) (iv) लङलकारः
   - (द) (ii) मध्यम पुरूषः
   - (इ) (iii) कुत्र

4. (अ) (i) शानच्                                  1X5
   - (ब) (ii) विद्यावान्
   - (स) (i) पठितवान्
   - (द) (iii) क्त्वा
   - (इ) (ii) लघुत्वम्

5. रिक्त स्थान पूर्तिः :–                                  1X5
   - (क) कुशलं
   - (ख) पापेऽपि
   - (ग) सप्तहोता
   - (घ) श्रेष्ठः
   - (ङ) प्राणैः

06. एक वाक्येन उत्तराणि –

(क) दयानदस्य जन्मनाम मूलशंकरः आसीत्।

(ख) मे मनः शिवसंकल्पमस्तु।

(ग) घटोत्कचः अन्ते कथयति अहो!

''स्वजनवात्सल्यम्'' इति।

(घ) सर्वप्राचीना भाषा संस्कृतभाषा अस्ति।

(ड.) यत्र नार्यस्तु पूज्यन्ते तत्र देवताः रमन्ते।

7. शब्दरूपाणि – 1X2

| | | |
|---|---|---|
| (i) साधुना | साधुभ्याम् | साधुभिः |
| (ii) राज्ञः | राज्ञोः | राज्ञाम् |
| (iii) अहम् | आवाम् | वयम् |

8. विभक्ति – वचनंम् 1X2

| | | |
|---|---|---|
| (i) पितुः | – पंचमी / षष्ठी | – एक वचनम् |
| (ii) रामेषु | – सप्तमी | – बहुवचनम् |
| (iii) त्वया | – तृतीया | – एक वचनम् |

09. गघांशानाम् – उत्तराणि

(अ)

(i) वरूणदेवः वृष्टि वर्षति।

(ii) सूर्यदेवः प्रकाशं प्रयच्छति।

(iii) भूमाता वृक्षस्य आधारभूता अस्ति।

(iv) वायुः अनिलं ददाति।

(v) वरूणदेवः, सूर्यदेवः, भूमाता, वायुः सर्वे परोपकारिणः।

(ब)

(i) सूर्यवंशस्य राजा सगरः आसीत्।

(ii) सः एकदा अश्वमेद्ययागं कृतवान्।

(iii) यागस्य अश्वः यत्र–तत्र संचारं कृतवान।

(iv) देवेन्द्र यागस्य विघ्नं कर्तुं मार्ग चिन्तितवान्।

(v) इन्द्रः अश्व गृहीत्वा पाताल लोके कपिलमुनेः पुरतः स्थापितवान्।

(स)

(i) मध्यप्रदेशस्था विदिशा नगरी पौराणिकी ऐति हासिकी च वर्तते।

(ii) विदिशा प्राचीनकाले ''भेलसा' इति नाम्ना सुविख्याता आसीत्।

(iii) ''भेल्लस्वामिनः इति सूर्यदेवतायाः मंन्दिरस्य लोक ख्यातिः।

(iv) पुरा विदिशा नगरी समुन्नतमेकं वाणिज्यिकं केन्द्रमासीत्।

(v) पंतजलिः व्याकरण महाभाष्यस्यकर्ता आसीत्।

10. पद्यांशानाम् उत्तराणि–

(अ)

(i) भूताति दानेन वशी भवन्ति।
(ii) दानेन वैराण्यपि नाशं यान्ति।
(iii) दानैः परः अपि बन्धुत्वम उपैति।
(iv) दानं सर्वव्यसनानि हन्ति।
(v) प्रथम पुरूषः एकवचनम्।

(ब)

(i) मत्ता गजेन्द्राः।
(ii) गवेन्द्राःमुदिताःभवन्ति।
(iii) वनेषु विक्रान्ततराः मृगेन्द्राः।
(iv) नरेन्द्राः निभृताः सन्ति।
(v) सुरेन्द्रः वारिधरैः सह प्रक्रीडितः।

(स)

(i) दरिद्रता धीरतया विराजते।
(ii) कुवस्त्रता शुभ्रतया विराजते।
(iii) कदन्नता उष्णतया विराजते।
(iv) शीलतया, कुरूपता विराजते।
(v) वि उपसर्ग, राज्धातु, लट् लकारः।

11 युग्ममेलनम्

| "अ" | "ब" |
|---|---|
| (क)समयस्य सदुपयोगः | कर्तव्यः |
| (ख) प्रकृतिदत्त वरः | वृक्ष |
| (ग) द्विजश्रेष्ठः | वृद्धः |
| (घ) वेदव्यासः | महाभारतम् |

12. शुद्धाशुद्धौ (आम!/न) 4

(अ) आम्
(ब) न
(स) न
(द) आम्

13. एक पदेन उत्तराणि – 1X4

(अ) हिन्दी भाषायाः
(ब) चम्पतरायः
(स) ब्राम्हणी
(द) सदवृत्तम्
(इ) जीवनम्

14. सुभाषितम्। 2X2

प्रत्येकशुद्धसुभाषितस्य कृते अंक द्वयं निर्धारितम्।

15. पत्रे संकेत – सम्बोधनं

दिनांक भाषादिकं च दृष्ट्वा शुद्धपत्रस्य कृते चत्वारः अंकाः प्रदानीयाः।

16. कारक वाक्यांना शुद्धि ।

(अ) जलं/जलात्जलेन बिना जीवनं नास्ति।

(ब) बालकाय मोदकं रोचते।

(स) श्री रामाय नमः।

(द) त्वम् भोपाल नगरे निवससि।

(इ) कृष्कः ग्राम गच्छति।

17. कथाक्रम संयोजनम्

(ख) गंगातीरे मार्कण्डेयनाम कश्चन मुनिः वसति स्म।

(घ) वासुदेव तस्य प्रिय शिष्यः आसीत्।

(ङ.) किंचिदग्रे गतः वासुदेव कांचित् देवालयम् अपश्यत्।

(ग) शिष्यः अनन्तरं रामनाथपुरं प्रति प्रस्थितवान्।

(क) ततः वासुदेवः रामनाथपुरं प्राप्य रामदेवस्य गृहम अगच्छत्।

18. अपठिताशं – उत्तराणि

(अ) सत्सग्डतिः

(ब) स्वसमुन्नतिम् इच्छता जनेन सर्वदा सतामेव संगतिर्विधेया।

(स) सज्जनानां संसर्गेण जनः सज्जनः भवति।

(द) गद्यांशस्यास्य सारः यत् – ''सर्वदा सतामेव संगतिः करणीया'' इति।

(द) दुर्जनः शब्दस्य विलोम शब्द सज्जनः इति।

19. निबन्ध।

सम्पूर्ण शुद्ध निबन्धस्य कृते दश अंका निर्धारिताः सन्ति।

– – X X – –